No. २४०३
क

Title आगमोक्त भैरव पूजा

Author

Extent २ पत्रे Age

Subject तन्त्र

5863
F-2 complete

आगमोक्तभैरवपूजा

नं. १८०३

नं. १४०३ क

२ पत्रे



श्रीगुरुवे शिवाय योनमः

विघ्नहर्त्रे नमः — श्रीभैरवोवाच — अथ दीपविधि श्रीपार्वत्युवाच

ओं ह्रूँ ह्रीं श्रीं क्लीं ह्रीं श्रीं सर्वज्ञाय प्रचण्ड पराक्रमाय अजयतिवटुकाय इमं
दीपं गृह्ण गृह्ण सर्वकार्याणि साधय साधय दुष्टान् नाशय नाशय सर्वतो मम रक्षां कुरु कुरु हूं फट्
स्वाहेति दीपमंत्रः ओं ह्रीं अजयंताय नमः ओं ह्रूँ ह्रीं प्रद्योषाय नमः
ओं ह्रीं चामीकराय नमः ओं ह्रीं प्रसिद्धाय नमः ओं ह्रीं भीषणाय नमः ओं ह्रीं
प्रचंडाय नमः ओं ह्रीं करालाय नमः ओं ह्रीं कपालिने नमः मध्ये वटुकमा
वाह्य संपूज्य दीपं दत्वा पूर्वादि प्रादक्षिण्येन क्रमात् अजयंतादीन् पश्चाद् विदु
क्षीरवृक्षकीलकानासेप्य वलिपूजादिना रोपयेदिति ओं सिद्धिः
अथातः संप्रवक्ष्यामि वटुकस्य वरानने दीपदानं सर्वकर्मसाधनं [illegible]
प्रसवावहं चतुरस्रं शुभं सम्यक् कलशसुन्दरं दिने गोमयेनोप
लिप्य अष्टमं डलं रचयित्वा ततः रक्तीलाष्टकं चाष्टदिक्षु दद्यात् स्नानु
नाप्रियेत् अष्टकीलषु विधिवद् लिं दीपसमन्वितं ३ पूर्वादि पूजितं
रक्तचंदनैः करवीरैः कुसुमैः ओं ह्रीं अजयंताय ह्रीं प्रद्योषाय रुद्ररी ४
ह्रीं चामीकराय तथा ह्रीं प्रसिद्धाय तथैव च ह्रीं भीषणाय प्रचंडाय करालाय
कपालिने नमस्कृत्य गणेशं ह्रीं गुरुं देवेशं शिवं चतुः तोय घोलितं वे
रक्तचंदनवारिणा चतुरस्रं मालिप्य तत्र देवं विचित्य चतुर्दले
पूरयित्वा रक्तचंदनलोलितं पीठं पूजां विधायाघ्यपात्रं संस्थाप्य
तत्र च ८ तं तत्कार्यवशाद् वीतत्र द्रव्यं प्र पूजयेत् गव्यमाज्यं शां
तिकृत्ये कौसुंभस्तंभने [illegible] ९ तिल तैलं तथा गव्यं घृतं वश्ये प्रकल्पयेत्
कटुतैलं द्वेषणे च राजिकं मारणे स्मृतं १० आज्यं चोष्ट्र माहिषं च घृतं
चोच्चाटने स्मृतं अथवा सर्वकार्येषु तिलतैलं प्रशस्यते ११
प्राप्तम भाषितं प्रोक्तं फलानां प्रथमोविधौ अष्टाशीति द्विती येत
परेष्टाविंशतिः प्रियेश १२ सर्वकार्येषु देवशी संख्या प्रोक्ता त्रिधा
त्र वै शुभकार्येषु ताम्रमयं विपरीतेषु लोहजं १३ शुभे सौम्यसुरवो दीप
स्त्वशुभे स्याद् दक्षिणामुखं शतेन त्रिशतेनाथ सहस्रेनाथ वर्तिका १४ कारयित्वा शुभे पात्रे
स्थाप्य प्रज्वालयेद् दश दीपं सम्यक् पूजयेत् ततः संकल्पमाचरेत् १५ प्रणवं
पूर्वमुच्चार्य ततो लज्जा रमां तथा कामं लज्जां रमां चैव सर्वज्ञाय तं तत्र डेंतं तथा
प्रचंडेति पराक्रम [illegible] ततः डे तं वटुकमुद्धृत्य इमं दीपं वचो वदेत्
गृहाण गृहाण सर्वकार्याणि साधय इति च दुष्टान् नाशय युग्मं त्रासयेति पदं द्विधा
सर्वतो मम रक्षां कुरु कुरु हुं फट् स्वाहा।

दीपदाने मनुसंख्या दीपा प्रयं
दीप विधि

सर्वतो भयरक्षां च कुरु युग्मं च वर्म च अस्त्रास्त्रमग्निवधूः प्रोक्तो बटुकस्य तु
वा नद्यै गोपनीयः प्रयत्नेन सत्तम सत्यं वचो ममः नदीतीरे शिवागारे
बिल्वमूले गिरौ गुहे सिद्धपीठे भैरवस्य संनिधौ कारयेद्धि वै २१
पुत्रप्राप्तिः सहस्रेण सिद्धिर्गुणे त्रयनागमः त्रिगुणे बंधनान्मुक्तिः तुर्यसंख्ये प्रि
यागमः २२ बाणसंख्या स्तम्भनं स्याद्द्रवसंज्ञो अयोमवेत् सप्तसंख्ये अग
हस्यो अष्टसंख्ये तु मोहनं २३ अंकसंख्ये च सरोत्साद उच्चाटो दशसंख्यकं
एकादशेति देवेशि त्वखिलसिद्धयः स्मृता २४ लक्षमेके तु देवेशि चक्रवर्ती
भवेद्ध्रुवं कोटिसंख्ये महादेवी भवेद्भैरवसंनिभं २५ गोका यो विवहारे तु
अपस्यसप्तशति न ही अधिक भीति वाष्णि उपरुद्रसंख्ये ज्ञानी स्मृतं २६
इति रुद्रयामले तंत्रे वटुकभैरव दीपविधिः ॥ हस्ताभ्यामंजलिं व
ध्वा नामिकामूलपर्वणोः अंगुष्ठौ निक्षिपेत्सायं मुद्रा त्वाह्वानि स्मृ १
अधोमुखी त्वियं चेस्यात्स्थापिनी मुद्रिका स्मृता उच्छ्रितांगुष्ठमुष्टि
तस्तु संयोगात्सन्निधापिना २ अंतःप्रवेशितांगुष्ठावेवसंरोधिनी मता उत्तानमुष्टियुगला
संमुखीकरणे मता ३ देवतांगे षडंगानां न्यासः स्यात्सकली मता। सव्यहस्तकृमान्मुष्टि
दीर्घाधोमुखतर्ज्जनी ४ अवगुंठनमुद्रेयमभितो भ्रामिता भवेत् अन्योन्याभिमुखाश्लिष्टा
कनिष्ठानामिकापुनः ५ तथैव तर्ज्जनीमध्ये धेनुमुद्रा समीरिता अमृतीकरणं कुर्या
त्तया साधकसत्तमः ६ अन्योन्यग्रथितांगुष्ठे प्रसारितपरांगुली: महामुद्रेयमुदि
ता परमीकरणे बुधैः ७ एतामुद्राः समादिष्टा देवावाहनकर्म्मणि ॥इति न्यासः॥ ॥
अथास्तुति मंत्रः ॥ ॐ शुद्धस्फटिकसंकाशं सहस्रादित्यवर्चसं नीलजीमूतसंकाशं
नीलांजनसमप्रभं अष्टबाहुं त्रिनयनं चतुर्बाहुं द्विबाहुकं दंष्ट्राकरालवदनं नूपुरा
रावसंकुलं भुजंगमेखलं देवमग्निवर्णशिरोरुहं दिगंबरं कुमारीशं वटुकाख्यं महा
बलं खट्वांगमसिपाशौ च शूलं दक्षविभागतः डमरुं च कपालं च वरदं भुजगं तथा।
आत्मवर्णसमोपेतं सारमेयसमन्वितं ध्यात्वा जपेत्सुसंहृष्टः सर्वान्कामानवाप्नु
यात् ॥ इति भैरवस्तुतिः॥ ॥ अथ मंत्रः॥ ॐ ह्रीं वटुकाय आपदुद्धारणाय कुरु
कुरु वटुकाय ह्रीं ॐ ॥ अथ भैरवपूजाविधिः॥ श्रीपार्वत्युवाच ॥ कथयस्व प्र
सादेन भैरवस्य च पूजनं येन पूजनमात्रेन पुरुषः सिद्धिभाग्भवेत् १ ॥ श्रीशिवो
वाच॥ सकामं परदेवत्यं शृणु देवी प्रयत्नतः पूजयेद्भैरवं चादौ सर्व्वसिद्ध
ये २ पाददस्य च सेतुं शुद्धं शुध्यर्थं तथा कष्टविभंजने राज्यकार्ये यद्युद्धे वै यात्रा
र्थे तु विशेषतः ३ वृद्ध्यर्थे धनसंपत्तौ मानि दुःखः प्रशांतये सद्यः सिद्ध्यंति कार्या
णि रात्रौ भैरवपूजनात् तंडुलाष्टदलं कृत्वा स्थापयेत्कलशमुत्तमं श्रीफलं च
दनं वस्त्रं रक्तचंदनचर्चितं आदौ न्यासं प्रकुर्वीत पूजनं च ततः क्रमात्॥ पूर्वं कृतस्ना
नं शुचिर्भूत्वा आचमनत्रयं॥ ततो नित्यकर्म्म विवत् पश्चात्कर संपुटं कृत्वा आद्यादि-

प्रयोगः॥ अमुककामनासिध्यर्थं भैरवपूजनमहंकरिष्ये ततोस्य वाम
पार्श्वे विचित्रकंबलादि आसनं पृथ्वी त्वयाधृतालोकेति मंत्र आसनंततो
उपविश्य पद्मासनाय नमः ॥ॐ अस्य श्री वटुकभैरवमंत्रस्य बृहदारण्य ऋषिः
आनंदभैरवो देवता अनुष्टुप् छंदः ॐ बीजं भैरवस्य शक्तिः वटुकाय कीलकं
हृदये मुखे शिरसि शिखायां बाह्वो नेत्रत्रयाय अस्त्राय फट् एतत् षडंगादिशासा
घनं स्थापनं पूजनं षोडशोपचारैः कर्त्तव्यं माषपिष्टमयपात्रं तिलतैलेन
पूरयेत् रक्तसूत्रेण वर्त्तिः स्यात् अष्टाविंशतितंतवः उत्तराभिमुखं दीपं कु
र्याद्भैरवसन्निधौ तावद्दीपं च संरक्षेत् यावत्सूर्योदयो भवेत् देवालयेहती
र्थेवागोष्टेद्वीजगृहेपिवा स्वगृहे श्रद्धयायुक्तो स्थाप्य भैरवदेवता असितांगो रु
रुश्चंडः क्रोधमुन्मत्तभैरव कपालभीषणश्चेति संहारश्चाष्टभैरवः कनकभै
रवस्थापनं वटुकभैरवस्थापन आनंदभैरवस्थापनं असितांगभैरव० रुरु
भैरव० चंडभैरव० क्रोधभैरव० उन्मत्तभैरव० कपालभैरव० भीषणभैरव०
संहारभैरव० तत्रयोगिनी चतुर्षष्टिनामानि स्थापनं कुबेर माणवकादियक्षस्था
पनं एकादशरुद्रस्थापनं दिक्पालस्थापन कुलदेवतास्थापनं वैदिको मंत्रः
वटुकभैरवमंत्र ह ह्वयो मंत्रेण प्रतिष्ठा पूजा यंत्र संस्थापिता येन तत्र पूजां प्रकल्प
ल्पयेत् रक्तकुंकुमैः सिंदूर कुंकुमाक्तते कीशरान्नं पायस पूपा माषान्नं
दधिवोदनं नैवेद्यं च प्रदातव्यं सदा भैरवतुष्टये पूजांते तु भैरवस्य पठेन्ना
मसहस्रकं आपदोद्धार स्तोत्र मंमंत्रस्य पाठ विचक्षण रात्रौ जागरणं कार्यं सद्वि
जैः सहबांधवैः पुनर्पूजनं कुर्यात्स्वस्वमंत्र नामपृथक्पृथक् श्रीफलेन अ
र्घं दद्यात् नैवेद्यैश्च ऋतुः फलैः आरात्रिक स्तुतिपाठं कृत्वा ब्राह्मणपूजनं
स्तुकुंभेनाभिषेकश्च सपुत्रैः सहबांधवै ततो विप्राय दातव्यं सघृतं कीशरान्न
कं अपक्वं द्रोणसंख्याकं रक्तवस्त्रेण संयुतं भूरिदान तिलकं स्यात् आशीर्वा
दविसर्जनं विशेषेण तु कामेन नानासिद्धिप्रसिद्धये माघमासे सिते पक्षे भौ
मयुक्ताष्टमी तया तद्दिने च प्रकर्त्तव्यं नाना पुजोपहारकैः शुद्धस्फटिकसंकाशं
इति मंत्रः ॥ एवं ध्यात्वा कृतं येन तस्य कार्यं च सिद्धये अथ मंत्रः ॐ ह्रीं वटुका
य आपदुद्धारणाय कुरु कुरु वटुकाय ह्रीं ॐ इति मंत्रः ॥इति श्री आगमोक्त
भैरवपूजासमाप्तम् ॥ शुभम् ॥ ॥ ॥ ॥ ॥॥